दैवकृताद्विनाशाद्विना । तथा स्वापराधरहिताद्राजकृतात् । दैवराजकृते तु विनाशे सवृद्धिकं मूल्यं दातव्यमधमर्णेनाध्यन्तरं वा यथाह । "स्रोतसापहृते चेत्रे राज्ञा चैवापहारिते । आधिरन्योऽथ कर्त्तव्योदेयं वा धनिने धनमिति" । तत्र स्रोतसापहृत इति दैवकृतोपलक्षणम् । अपि च "आधेः स्वीकरणात्सिद्धीरक्ष्यमाणोऽप्यसारताम् । यातश्चेदन्य आधेयोधनभाग्वा धनी भवेत्" या० । आधेर्गोप्यस्य भोग्यस्य च स्वीकरणादुपादानादाधिग्रहणसिद्धिर्न साक्षिलिखनमात्रेण नाप्युद्देशमात्रेण । यथाह नारदः । "आधिस्तु द्विविधः प्रोक्तोजङ्गमःस्थावरस्तथा । सिद्धिरत्रोभयस्यापि भोगोयद्यस्ति नान्यथेति"। अस्य च फलम् ।"आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरेति" । या स्वीकारान्ता क्रिया सा पूर्वा बलवती स्वीकाररहिता तु पूर्वापि न बलवतीति । सचाधिः प्रयत्नेन रक्ष्यमाणोऽपि कालवशेन यद्यसारतामविकृत एव सवृद्धिकमूल्यद्रव्यापर्याप्ततांगतस्तदाधिरन्यः कर्त्तव्यः ।"धनिने वा धनन्देयं रक्ष्यमाणोऽप्यसारतामिति"वदताऽऽधिः प्रयत्नेन रक्षणीयो धनिनेति ज्ञापितम् । आधिःप्रणश्येद्द्विगुण इत्यस्यापवादमाह । "चरित्रबन्धककृतं सवृद्ध्या दापयेद्धनम् । सत्याङ्कारकृतन्द्रव्यं द्विगुणम्प्रतिदापयेत्"या० चरित्रं शोभनाचरितम् चरित्रेण बन्धकम् चरित्रबन्धकम् तेन यत् द्रव्यमात्मसात्कृतम्पराधीनं वा कृतम् । एतदुक्तम्भवति धनिनः स्वच्छाशयत्वेन बहुमूल्यमपि द्रव्यमाधीकृत्याधमर्णेनाल्पमेव द्रव्यमात्मसात्कृतम् । यदि वाऽधमर्णस्य स्वच्छाशयत्वेनाल्पमूल्यमाधिं गृहीत्वा बहुद्रव्यमेव धनिनाधमर्णाधीनं कृतमिति तद्धनं न्यधोवृद्ध्या सह दापयेत् । अयमाशयः एवंरूपं बन्धकं द्विगुणीभूतेऽपि द्रव्ये न नश्यति किन्तु द्रव्यमेव द्विगुणन्दातव्यमिति । तथा सत्यङ्कारकृतं करणङ्कारः भावे घञ् सत्यस्य कारः सत्यङ्कारः"कारे सत्यागदस्येति"पा० मुम् सत्यङ्कारेण कृतं सत्यङ्कारकृतम् । अयमभिसन्धिः यदा बन्धकार्पणसमय एवेत्थं परिभाषितं द्विगुणीभूतेऽपि द्रव्ये मया द्विगुणं द्रव्यमेव दातव्यम् नाधिनाश इति तदा तत्द्विगुणन्दापयेत् इति । अन्योऽर्थः । चरित्रमेव बन्धकञ्चरित्रबन्धकम् । चरित्रशब्देन गङ्गास्नानाग्निहोत्रादिजनितमपूर्वमुच्यते यत्र तदेवाधीकृत्य यद्द्रव्यमात्मसात्कृतम् । तत्र तदेव द्विगुणभूतन्दातव्यन्नाधिनाश इति । "आधिप्रसङ्गादन्यदुच्यते । सत्यंकारकृतमिति क्रयविक्रयादिव्यवस्थानिर्वाहाय यदङ्गुलीयकादि परहस्ते कृतं तद्व्यवस्थातिक्रमे द्विगुणन्दातव्यं तत्रापि येनाङ्गुलीयकाद्यर्पितं सएव चेद्व्यवस्थातिवर्त्ती तेन तदेव हातव्यम् । इतरश्चेद्व्यवस्थातिवर्त्ती तदा तदेवाङ्गुलीयकादिद्विगुणम्प्रतिदापयेदिति । किञ्च "उपस्थितस्य मोक्तव्य आधिः स्तेनोऽन्यथा भवेत् । प्रयोजकेऽसति धनं कुलेऽन्यस्याधिमाप्नुयात्" या० । धनदानेनाधिमोक्षणायोपस्थितस्याधिर्मोक्तव्योधनिना वृद्धिलोभेन न स्थापयितव्यः । अन्यथा अमोक्षणे स्तेन चौरवद्दण्ड्यो भवेत् । असन्निहिते पुनःप्रयोक्तरि कुले तदाप्तहस्ते सवृद्धिकं धनं निधायाधमर्णः स्वीयं बन्धकं गृह्णीयात् । अथ प्रयोक्ताप्यसन्निहितस्तदाप्ताश्च धनस्य ग्रहीतारो न सन्ति यदि वा असन्निहिते प्रयोक्तरि आधिविक्रयेण धनदित्साऽधमर्णस्य तत्र किं कर्तव्यमित्यपेक्षिते आह । "तत्कालकृतमूल्योवा तत्र तिष्ठेदवृद्धिकः" या०। तस्मिन् काले यस्तस्याधेर्मूल्यन्तत्परिकल्प्य तत्रैव धनिनि तमाधिं वृद्धिरहितं स्थापयेन्न तत ऊर्द्ध्वं धनं वर्द्धते यावद्धनी धनं गृहीत्वा तमाधिं मुञ्चति यावद्वा तन्मूल्यद्रव्यमृणिने । प्रवेशयति यदा तु द्विगुणीभूतेऽपि धने द्विगुणन्धनमेव ग्रहीतव्यम् नत्वाधिनाश इति विचारितमृणग्रहणकालएव तदा द्विगुणीभूते द्रव्ये असन्निहिते वाऽधमर्णे धनिना किं कर्त्तव्यमित्यतआह । "विना धारणकाद्वापि विक्रीणीत ससाक्षिकम्" या०। धारणकादधमर्णाद्विना असन्निहिते साक्षिभिस्तदाप्तैश्च सह तमाधिं विक्रीय तत् धनं गृह्णीयाद्धनी वाशब्दो व्यवस्थितविकल्पार्थः । यदृणग्रहणकाले द्विगुणीभूतेऽपि धने धनमेव गृहीतव्यम् नत्वाधिनाश इति न विचारितम् । तदा आधिः प्रणश्येत् द्विगुण इत्याधिनाशः । विचारिते त्वयं पक्ष इति । भोग्याधौ विशेषमाह । "यदा तु द्विगुणीभूतमृणमाधौ तदा खलु । मोच्य आधिस्तदुत्पन्ने प्रविष्टे द्विगुणे धने"या० यदा प्रयुक्तं धनं स्वकृतया वृद्ध्या द्विगुणीभूतन्तदाधौ कृते तदुत्पन्ने आध्युत्पन्ने द्विगुणे धनिनः प्रविष्टे धनिनाधिर्मोक्तव्यः यदि वादावेवाधौ दत्ते द्विगुणीभूते द्रव्ये त्वयाधिर्मोक्तव्य इति परिभाषया कारणान्तरेण वा भोगाभावेन यदा द्विगुणीभूतमृणन्तदाधौ भोगार्थं धनिनि प्रविष्टे तदुत्पन्ने द्रव्ये द्विगुणे सत्याधिर्मोक्तव्यः । अधिकोपभोगे तदपि देयम् । सर्वथा सवृद्धिकमूलर्णापाकरणार्थाध्युपभोगविषयमिदं वचनम् । तमेनं क्षयाधिमाचक्षते लौकिकाः यत्र तु वृद्ध्यर्थे